गुरोर्वर्षं: १ दिनम् २० फलम् ।
धर्म्मार्थकामसौख्यानि ददाति विबुधार्च्चित: ।
कुष्ठादिव्याधिहन्ता च भानो: पाकदशां गत: ॥६॥
राहोर्मासा: ८ फलम् ।
अशुभाशुभवं द्वेषं व्याधिभीतिसुतक्षयान् ।
कुरुते सिंहिकासून् रविपाकदशां गत: ॥ ७ ॥
शुक्रस्य वर्ष: १ मासौ २ फलम् ।
कोष्ठशीर्षाशिरोरोगज्वरान् शूलादिदारुणान् ।
शोकं करोति भृगुज: सूर्य्यस्यान्तर्दशां गत: ॥८॥
एवं वर्षा: ६ ॥ ❋ ॥ चन्द्रस्य स्थूलदशावर्षा: १५
तस्यैवान्तर्दशावर्षौ २ मास: १ फलम् ।

कुर्य्याद्विभूतिवरवाहनमातपत्र-
क्षेमप्रतापबलवीर्य्यसमन्वितानि ।
मिष्टान्नपानशयनासनभोजनानि
चान्द्री दशा प्रचुरकाञ्चनभूमिदात्री ॥

कुजस्य वर्ष: १ मास: १ दिनानि १० फलम् ।
पित्तशोणितपीड़ाश्च चौरादीनां भयन्तथा ।
मङ्गल: कुरुते नित्यं विधोरन्तर्दशां गत: ॥
बुधस्य वर्षौ २ मासा: ४ दिनानि १० फलम् ।
सर्व्वत्र द्रव्यलाभश्च गजाश्वगोधनानि च ।
चन्द्रज: कुरुते सौख्यं विधोरन्तर्दशाङ्गत: ॥
शनेर्वर्ष: १ मासा: ४ दिनानि २० फलम् ।
बन्धुक्लेशं नृपाद्भीतिं व्यसनं शोकसम्पदम् ।
विनाशं कुरुते सौरिश्चन्द्रस्यान्तर्दशाङ्गत: ॥
गुरोर्वर्षौ २ मासा: ७ दिनानि २० फलम् ।
दानसौख्यानि सम्भोगं वस्त्रालङ्कारभूषणम् ।
कुरुते विबुधाचार्य्यो विधोरन्तर्दशाङ्गत: ।
राहोर्व्वर्ष: १ मासा: ८ फलम् ॥
वह्निशत्रुभयं दु:खं शोकं बन्धुधनक्षयम् ।
कुरुते राहुरत्यर्थं चन्द्रपाकदशाङ्गत: ॥
शुक्रस्य वर्षौ २ मासा: ११ फलम् ।
सेवते वरनारीभिर्नरो लक्ष्मीश्च वर्त्तते ।
मुक्ताहारमणिप्राप्तिर्विधोरन्तर्गते सिते ॥
रवेर्मासा: १० फलम् ।
ऐश्वर्य्यं बहुसौख्यञ्च व्याधिनाशमरिक्षयम् ।
नृपतेजो रवि: कुर्य्याद्विधो: पाकदशाङ्गत: ॥
एवं वर्षा:-१५ ॥❋॥ कुजस्य स्थूलदशावर्षा: ८ ।
तस्यान्तर्दशामासा: ७ दिनानि ३।२०। फलम् ।

क्रूराभिघातवधबन्धभयानि धत्ते
चिन्ताज्वरं विकलशून्यगृहाश्रमञ्च ।
चौराग्निभीतिधनहानिनरेन्द्रपीड़ा:
कुर्य्याद्विनाशनिधनञ्च दशा कुजस्य ॥

बुधस्य वर्ष: १ । ३ । ३ । २० । फलम् ।
परमैश्वर्य्यमतुलं नानाविधसुखाश्रयम् ।
करोति सोमपुत्रश्च क्षितिजान्तर्दशाङ्गत: ॥
शनेर्मासा: ८ । २६ । ४० । फलम् ।
रिपुचौराग्निभीतिश्च रोगमन्तरसम्भवम् ।
महाजनकृतो द्वेष: कुजस्यान्तर्गते शनौ ॥
गुरोर्वर्ष: १ । ४ । २३ । ४० । फलम् ।
पुष्पधूपान्नवस्त्राद्यैर्देवब्राह्मणपूजनम् ।
नृपतुल्यत्वमाप्नोति कुजस्यान्तर्गते गुरौ ॥
राहोर्मासा: १० । २० । फलम् ।
आत्मकार्य्यार्थमुद्वेगं बन्धचौरादिसाध्वसम् ।
कुरुते सिंहिकापुत्रो भौमस्यान्तर्दशाङ्गत: ॥
शुक्रस्य वर्ष: १ । ६ । २० । फलम् ।
धनवृद्धिं सुखादींश्च नानावस्त्रं वरस्त्रिय: ।
प्राप्नोति विपुलां लक्ष्मीं कुजस्यान्तर्गते भृगौ ॥
रवेर्मासा: ५ । १० । फलम् ।
नानारत्नञ्च सौख्यञ्च भूमिलाभमथ।।प वा ।
नृपपूजामवाप्नोति कुजस्यान्तर्गते रवौ ॥
सोमस्य वर्ष: १ । १ । १० । फलम् ।
धनलाभं सुखं भोगं शरीरारोग्यमेव च ।
लोकानन्त्यमवाप्नोति क्षितिजान्तर्गते विधौ ॥
एवं वर्षा: ८ ॥ ❋ ॥ बुधस्य स्थूलदशावर्षा: १७ ।
तस्यान्तर्दशा २ । ८ । ३ । २० । फलम् ।

दिव्याङ्गनावदनपङ्कजषट्पदत्वं
लीलाविलासवरभोगसुखोदयञ्च ।
नानाप्रकारविभवागमकोषवृद्धिं
क्षिप्रं लभेद्बुधदशा प्रबलाश्च सिद्धिम् ॥

शनेर्वर्ष: १ । ५ । २६ । ४० । फलम् ।
वातश्लेष्मकृता पीड़ा विरहो बन्धुभि: सह ।
विदेशगमनञ्चैव बुधस्यान्तर्गते शनौ ॥
गुरोर्वर्षौ २ । ११ । २६ । ४० । फलम् ।
व्याधिशत्रुभयत्यक्तो धनाढ्यो नृपवल्लभ: ।
लभेद्भार्य्यां सुपुत्रञ्च बुधस्यान्तर्गते गुरौ ॥
राहोर्वर्ष: १ । १० । २० । फलम् ।
बन्धुनाशं मनस्तापं देशत्यागञ्च बन्धनम् ।
करोति बहुदु:खानि बुधस्यान्तर्गतस्तम: ॥
शुक्रस्य वर्षा: ३ । ३ । २० । फलम् ।
धनाढ्यं बन्धुपुत्रञ्च धर्म्मवत्त्वं धनागमम् ।
कुरुते दानवाचार्य्यो बुधपाकदशाङ्गत: ॥
रवेर्मासा: ११ दिनानि १० । फलम् ।
श्रिया परमया युक्तो गजवाजिधनान्वित: ।
प्रभाकर: करोत्याशु बुधपाकदशाङ्गत: ॥
सोमस्य वर्षौ २ । ४ । १० । फलम् ।
कण्टकादिप्रवेशश्च शृङ्गिभ्यो भयमेव च ।
निशाकर: करोत्याशु बुधपाकदशाङ्गत: ॥
कुजस्य वर्ष: १ । ३ । ३ । २० । फलम् ।
कफपित्तसमुद्भूतां शिर:पीड़ां भयावहाम् ।
माहेय: कुरुते शोकं बुधस्यान्तर्दशाङ्गत: ॥
एवं वर्षा: १७ ॥❋॥ शने: स्थूलदशावर्षा: १० ।
अस्यान्तर्दशामासा: ११ । ३ । २० । फलम् ।

मिथ्यापवादवधबन्धनिराश्रयत्वं
चौरादिभूपतिभुजङ्गमभीतिमुग्राम् ।
आशानिराशमथ चार्ज्जनकार्य्यहानिं
पङ्गोर्दशा प्रकुरुते नियतं नराणाम् ॥

गुरोर्वर्ष: १ । ८ । ३ । २० । फलम् ।
देवतागुरतं शान्तं नानाप्राप्तिं करोति च ।
तुङ्गसौख्यसमायुक्तं पङ्गोरन्तर्गतो गुरु: ॥
राहोर्व्वर्ष: १ । १ । १० । फलम् ।
नृपाद्भयं ज्वरं घोरं दु:खञ्च प्राणसंशयम् ।
धनक्षयञ्च कुरुते शनेरन्तर्गतस्तम: ॥
शुक्रस्य वर्ष: १ । ११ । १० । फलम् ।
सुहृद्बन्धुधनै: पूर्णो भार्य्यावित्तसमन्वित: ।
स्वर्णं सुखञ्च लभते सौरस्यान्तर्गते सिते ॥
रवेर्मासा: ६ । २० । फलम् ।
परदाराभिगमनं करोति खरदीधिति: ।
जीवनस्य च सन्देहं शनेरन्तर्दशाङ्गत: ॥
सोमस्य वर्ष: १ । ४ । २० । फलम् ।
स्त्रीनाशं कुक्षिरोगञ्च कफपित्तगदं शशी ।
बन्धुद्वेषञ्च कुरुते पङ्गोरन्तर्दशाङ्गत: ॥
कुजस्य मासा: ८ । २६ । ४० । फलम् ।
देहवैषम्य महारोगं नानादु:खानि भूमिज: ।
धननाशञ्च कुरुते शनेरन्तर्दशाङ्गत: ॥
बुधस्य वर्ष: १ । ६ । २६ । ४० । फलम् ।
आरोग्यं विजयं राज्यं बहुवित्तानि सोमज: ।
करोति त्वादरं लोके शनेरन्तर्दशाङ्गत: ॥
एवं वर्षा: १० ॥❋॥ गुरो: स्थूलदशावर्षा: १९ ।
तस्यैवान्तर्दशावर्षा: ३ । ४ । ३ । २० । फलम् ।

राज्यास्पदं तनयवित्तविलासभोगान्
पर्य्याप्तसौख्यधनधान्यसमाश्रयञ्च ।
विद्याप्रसादवररत्नसुखार्थभोग-
सिद्धिं दशा सुरगुरो: कुरुते प्रियत्वम् ॥

राहोर्वर्षौ २ । १ । १० । फलम् ।
बन्धुद्वेषं मृषावादं स्थानभ्रंशं निराश्रयम् ।
कलहं कारयेद्राहुर्गुरोरन्तर्दशाङ्गत: ॥
शुक्रस्य वर्षा: ३ । ८ । १० । फलम् ।
कलहं बन्धुभि: सार्द्धं वित्तनाशं मन:क्षतिम् ।
स्त्रीवियोगञ्च कुरुते जीवस्यान्तर्गत: सित: ॥
रवेर्वर्ष: १ । दिनानि २० । फलम् ।
बहुमित्रं बहुधनं सौभाग्यं राजवल्लभम् ।
कुरुते भास्कर: शान्तिं गुरोरन्तर्दशाङ्गत: ॥
सोमस्य वर्षौ २ । ७ । २० । फलम् ।
भोगाढ्यो बहुभार्य्य: स्यादरिपुरोगविवर्ज्जित: ।
नृपतुल्यो भवेच्चैव गुरोरन्तर्दशाङ्गत: ॥
कुजस्य वर्ष: १ । ४ । २६ । ४० । फलम् ।
तीक्ष्णरोषो रिपोर्हन्ता गजवह्नीमदर्शन: ।
सुखसौभाग्यसंयुक्त: कुजे चान्तर्गते गुरो: ॥
बुधस्य वर्षौ २ । ११ । २६ । ४० । फलम् ।
सुस्थोऽसुस्थ: सुखी दु:खी शत्रुवृद्धि: पुन: पुन: ।
देवार्चनपरो नित्यं जीवस्यान्तर्गते बुधे ॥
शनेर्वर्ष: १ । ८ । ३ । २० । फलम् ।
वेश्याजनाश्रयात् सौख्यं भवेद्धितविवर्ज्जित: ।
लुप्तनीतिमना नित्यं गुरोरन्तर्गते शनौ ॥
एवं वर्षा: १९ ॥ ❋ ॥ राहो: स्थूलदशावर्षा:
१२ । तस्यान्तर्दशावर्ष: १ । ४ । फलम् ।

भार्य्यादिदूषण-निदानविवादबन्ध-
शस्त्राभिघातभयहीनपराक्रमञ्च ।
अप्राप्तसौख्यधनकाञ्चनदीनदेहो
राहोर्दशा भवति जीवनसंशयाय ॥

शुक्रस्य वर्षौ २ । मासा: ४ । फलम् ।
शिरोरोगं कुदेहञ्च कुर्य्याद्भार्य्याञ्च चञ्चलाम् ।
बान्धवै: कलहो नित्यं राहोरन्तर्गते भृगौ ॥
रवेर्मासा: ८ । फलम् ।
शिरोरोगभयं घोरं म्रत्युं शोकञ्च दारुणम् ।
दृढदस्युभयं कुर्य्याद्राहोरन्तर्गतो रवि: ॥